# Raghuvansha 15 by Kalidas

# રઘુવંશં સર્ગઃ ૧૫ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha15

File name : raghuvansha15.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : Octobber 11, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Raghuvansha 15 by Kalidas

# રઘુવંશં સર્ગઃ ૧૫ કાલિદાસકૃતમ્

કૃતસીતાપરિત્યાગઃ સ રત્નાકરમેખલામ્ ।
બુભુજે પૃથિવીપાલઃ પૃથિવીમેવ કેવલામ્ ॥ ૧૫-૧ ॥

લવણેન વિલુપ્તેજ્યાસ્તામિસ્રેણ તમભ્યયુઃ ।
મુનયો યમુનાભાજઃ શરણ્યં શરણાર્થિનઃ ॥ ૧૫-૨ ॥

અવેક્ષ્ય રામં તે તસ્મિન્ન પ્રજહ્રુઃ સ્વતેજસા ।
ત્રાણાભાવે હિ શાપાસ્ત્રાઃ કુર્વન્તિ તપસો વ્યયમ્ ॥ ૧૫-૩ ॥

પ્રતિશુશ્રાવ કાકુત્સ્થસ્તેભ્યો વિઘ્નપ્રતિક્રિયામ્ ।
ધર્મસંરક્ષણાર્થૈવ પ્રવૃત્તિર્ભુવિ શાર્ઙ્ગિણઃ ॥ ૧૫-૪ ॥

તે રામાય વધોપાયમાચખ્યુર્વિબુધદ્વિષઃ ।
દુર્જયો લવણઃ શૂલી વિશૂલઃ પ્રાર્થ્યતામિતિ ॥ ૧૫-૫ ॥

આદિદેશાથ શત્રુઘ્નં તેષાં ક્ષેમાય રાઘવઃ ।
કરિષ્યન્નિવ નામાસ્ય યથાર્થમરિનિગ્રહાત્ ॥ ૧૫-૬ ॥

યઃ કશ્ચન રઘૂણાં હિ પરમેકઃ પરંતપઃ ।
અપવાદ ઇવોત્સર્ગં વ્યાવર્તયિતુમીશ્વરઃ ॥ ૧૫-૭ ॥

અગ્રજેન પ્રયુક્તાશીસ્તતો દાશરથી રથી ।
યયૌ વનસ્થલીઃ પશ્યન્પુષ્પિતાઃ સુરભીરભીઃ ॥ ૧૫-૮ ॥

રામાદેશાદનુગતા સેના તસ્યાર્થસિદ્ધયે ।
પશ્ચાદધ્યનાર્થસ્ય ધાતોરધિરિવાભવત્ ॥ ૧૫-૯ ॥

આદિષ્ટવર્ત્મા મુનિભિઃ સ ગચ્છંસ્તપસાં વરઃ ।
વિરરાજ રથપ્રષ્ઠૈર્વાલખિલ્યૈરિવાંશુમાન્ ॥ ૧૫-૧૦ ॥

તસ્ય માર્ગવશાદેકા બભૂવ વસતિર્યતઃ ।
રથસ્વનોત્કણ્ઠમૃગે વાલ્મીકીયે તપોવને ॥ ૧૫-૧૧ ॥

તમૃષિઃ પૂજયામાસ કુમારં ક્લાન્તવાહનમ્ ।
તપઃપ્રભાવસિદ્ધાભિર્વિશેષપ્રતિપત્તિભિઃ ॥ ૧૫-૧૨॥

તસ્યામેવાસ્ય યામિન્યામન્તર્વન્તી પ્રજાવતી ।
સુતાવસૂત સંપન્નૌ કોશદણ્ડાવિવ ક્ષિતિઃ॥ ૧૫-૧૩॥

સંતાનશ્રવણાદ્ભ્રાતુઃ સૌમિત્રિઃ સૌમનસ્યવાન્ ।
પ્રાઞ્જલિર્મુનિમામન્ત્ર્ય પ્રાતર્યુક્તરથો યયૌ॥ ૧૫-૧૪॥

સ ચ પ્રાપ મધૂપઘ્નં કુમ્ભીનસ્યાશ્ચ કુક્ષિજઃ ।
વનાત્કરમિવાદાય સત્ત્વરાશિમુપસ્થિતઃ ॥ ૧૫-૧૫॥

ધૂમધૂમ્રો વસાગન્ધી જ્વાલાબભ્રુશિરોરુહઃ ।
ક્રવ્યાદ્ગણપરીવારશ્ચિતાગ્નિરિવ જંગમઃ ॥ ૧૫-૧૬॥

અપશૂલં તમાસાદ્ય લવણં લક્ષ્મણાનુજઃ ।
રુરોધ સંમુખીનો હિ જયો રન્ધ્રપ્રહારિણામ્॥ ૧૫-૧૭॥

નાતિપર્યાપ્તમાલક્ષ્ય મત્કુક્ષેરદ્ય ભોજનમ્ ।
દિષ્ટ્યા ત્વમસિ મે ધાત્રા ભીતેનેવોપપાદિતઃ॥ ૧૫-૧૮॥

ઇતિ સંતર્જ્ય શત્રુઘ્નં રાક્ષસસ્તજ્જિઘાંસયા ।
પ્રાંશુમુત્પાટયામાસ મુસ્તાસ્તમ્બમિવ દ્રુમમ્॥ ૧૫-૧૯॥

સૌમિત્રેર્નિશિતૈર્બાણૈરન્તરા શકલીકૃતઃ ।
ગાત્રં પુષ્પરજઃ પ્રાપ ન શાખી નૈરૃતેરિતઃ॥ ૧૫-૨૦॥

વિનાશાત્તસ્ય વૃક્ષસ્ય રક્ષસ્તસ્મૈ મહોપલમ્ ।
પ્રજિઘાય કૃતાન્તસ્ય મુષ્ટિં પૃથગિવ સ્થિતમ્॥ ૧૫-૨૧॥

ઐન્દ્રમસ્ત્રમુપાદાય શત્રુઘ્નેન સ તાડિતઃ ।
સિકતાત્વાદપિ પરં પ્રપેદે પરમાણુતામ્॥ ૧૫-૨૨॥

તમુપાદ્રવદુદ્યમ્ય દક્ષિણં દોર્નિશાચરઃ ।
એકતાલ ઇવોત્પાતપવનપ્રેરિતો ગિરિઃ॥ ૧૫-૨૩॥

કાર્ષ્ણેન પત્રિણા શત્રુઃ સ ભિન્નહૃદયઃ પતન્ ।
અનિનાય ભુવઃ કમ્પં જહારાશ્રમવાસિનામ્॥ ૧૫-૨૪॥

વયસાં પઙ્ક્તયઃ પેતુર્હતસ્યોપરિ વિદ્વિષઃ ।
તત્પ્રતિદ્વન્દ્વિનો મૂર્ધ્નિ દિવ્યાઃ કુસુમવૃષ્ટયઃ॥ ૧૫-૨૫॥

સ હત્વા લવણં વીરસ્તદા મેને મહૌજસઃ ।
ભ્રાતુઃ સોદર્યમાત્માનમિન્દ્રજિદ્વધશોભિનઃ ॥ ૧૫-૨૬ ॥

તસ્ય સંસ્તૂયમાનસ્ય ચરિતાર્થૈસ્તપસ્વિભિઃ ।
શુશુભે વિક્રમોદગ્રં વ્રીડયાવનતં શિરઃ ॥ ૧૫-૨૭ ॥

ઉપકૂલં ચ કાલિન્દ્યાઃ પુરીં પૌરુષભૂષણઃ ।
નિર્મમે નિર્મમોઽર્થેષુ મથુરાં મધુરાકૃતિઃ ॥ ૧૫-૨૮ ॥

યા સૌરાજ્યપ્રકાશાભિર્બભૌ પૌરવિભૂતિભિઃ ।
સ્વર્ગાભિષ્યન્દવમનં કૃત્વેવોપનિવેશિતા ॥ ૧૫-૨૯ ॥

તત્ર સૌધગતઃ પશ્યન્યમુનાં ચક્રવાકિનીમ્ ।
હેમભક્તિમતીં ભૂમેઃ પ્રવેણીમિવ પિપ્રિયે ॥ ૧૫-૩૦ ॥

સખા દશરથસ્યાપિ જનકસ્ય ચ મન્ત્રકૃત્ ।
સંચસ્કારોભયપ્રીત્યા મૈથિલેયૌ યથાવિધિ ॥ ૧૫-૩૧ ॥

સ તૌ કુશલવોન્મૃષ્ટગર્ભક્લેદૌ તદાખ્યયા ।
કવિઃ કુશલવાવેવ ચકાર કિલ નામતઃ ॥ ૧૫-૩૨ ॥

સાઙ્ગં ચ વેદમધ્યાપ્ય કિંચિદુત્ક્રાન્તશૈશવૌ ।
સ્વકૃતિં ગાપયામાસ કવિપ્રથમપદ્ધતિમ્ ॥ ૧૫-૩૩ ॥

રામસ્ય મધુરં વૃત્તં ગાયન્તો માતુરગ્રતઃ ।
તદ્વિયોગવ્યથાં કિંચિચ્છિથિલીચક્રતુઃ સુતૌ ॥ ૧૫-૩૪ ॥

ઇતરેઽપિ રઘોર્વંશ્યાસ્ત્રયસ્ત્રેતાગ્નિતેજસઃ ।
તદ્યોગાત્પતિવત્નીષુ પત્નીષ્વાસન્દ્વિસૂનવઃ ॥ ૧૫-૩૫ ॥

શત્રુઘાતિનિ શત્રુઘ્નઃ સુબાહૌ ચ બહુશ્રુતે ।
મથુરાવિદિશે સૂન્વોર્નિદધે પૂર્વજોત્સુકઃ ॥ ૧૫-૩૬ ॥

ભૂયસ્તપોવ્યયો મા ભૂદ્વાલ્મીકેરિતિ સોઽત્યગાત્ ।
મૈથિલીતનયોદ્ગીતનિઃસ્પન્દમૃગમાશ્રમમ્ ॥ ૧૫-૩૭ ॥

વશી વિવેશ ચાયોધ્યાં રથ્યસંસ્કારશોભિનીમ્ ।
લવણસ્ય વધાત્પૌરૈરીક્ષિતોઽત્યન્તગૌરવમ્ ॥ ૧૫-૩૮ ॥

સ દદર્શ સભામધ્યે સભાસદ્ભિરુપસ્થિતમ્ ।

રામં સીતાપરિત્યાગાદસામાન્યપતિં ભુવઃ ॥ ૧૫-૩૯ ॥

તમભ્યનન્દત્પ્રણતં લવણાન્તકમગ્રજઃ ।
કાલનેમિવધાત્પ્રીતસ્તુરાષાડિવ શાર્ઙ્ગિણમ્ ॥ ૧૫-૪૦ ॥

સ પૃષ્ટઃ સર્વતો વાર્તમાખ્યદ્રાજ્ઞે ન સંતતિમ્ ।
પ્રત્યર્પયિષ્યતઃ કાલે કવેરાદ્યસ્ય શાસનાત્ ॥ ૧૫-૪૧ ॥

અથ જાનપદો વિપ્રઃ શિશુમપ્રાપ્તયૌવનમ્ ।
અવતાર્યાઙ્કશય્યાસ્થં દ્વારિ ચક્રન્દ ભૂપતેઃ ॥ ૧૫-૪૨ ॥

શોચનીયાસિ વસુધે યા ત્વં દશરથાચ્ચ્યુતા ।
રામહસ્તમનુપ્રાપ્ય કષ્ટાત્કષ્ટતરં ગતા ॥ ૧૫-૪૩ ॥

શ્રુત્વા તસ્ય શુચો હેતું ગોપ્તા જિહ્રાય રાઘવઃ ।
ન હ્યકાલભવો મૃત્યુરિક્ષ્વાકુપદમસ્પૃશત્ ॥ ૧૫-૪૪ ॥

સ મુહૂર્તં ક્ષમસ્વેતિ દ્વિજમાશ્વાસ્ય દુઃખિતમ્ ।
યાનં સસ્માર કૌબેરં વૈવસ્વતજિગીષયા ॥ ૧૫-૪૫ ॥

આત્તશસ્ત્રસ્તદધ્યાસ્ય પ્રસ્થિતઃ સ રઘૂદ્વહઃ ।
ઉચ્ચચાર પુરસ્તસ્ય ગૂઢરૂપા સરસ્વતી ॥ ૧૫-૪૬ ॥

રાજન્ પ્રજાસુ તે કશ્ચિદપચારઃ પ્રવર્તતે ।
તમન્વિષ્ય પ્રશમયેર્ભવિષ્યસિ તતઃ કૃતી ॥ ૧૫-૪૭ ॥

ઇત્યાપ્તવચનાદ્રામો વિનેષ્યન્વર્ણવિક્રિયામ્ ।
દિશઃ પપાત પત્રેણ વેગનિષ્કમ્પકેતુના ॥ ૧૫-૪૮ ॥

અથ ધૂમાભિતામ્રાક્ષં વૃક્ષશાખાવલમ્બિનમ્ ।
દદર્શ કંચિદૈક્ષ્વાકસ્તપસ્યન્તમધોમુખમ્ ॥ ૧૫-૪૯ ॥

પૃષ્ટનામાન્વયો રાજ્ઞા સ કિલાચષ્ટ ધૂમપઃ ।
આત્માનં શમ્બુકં નામ શૂદ્રં સુરપદાર્થિનમ્ ॥ ૧૫-૫૦ ॥

તપસ્યનધિકારિત્વાત્પ્રજાનાં તમઘાવહમ્ ।
શીર્ષચ્છેદ્યં પરિચ્છિદ્ય નિયન્તા શસ્ત્રમાદદે ॥ ૧૫-૫૧ ॥

સ તદ્વક્ત્રં હિમક્લિષ્ટકિઞ્જલ્કમિવ પઙ્કજમ્ ।
જ્યોતિષ્કણાહતશ્મશ્રુ કણ્ઠનાલાદપાતયત્ ॥ ૧૫-૫૨ ॥

કૃતદણ્ડઃ સ્વયં રાજ્ઞા લેભે શૂદ્રઃ સતાં ગતિમ્ ।
તપસા દુશ્ચરેણાપિ ન સ્વમાર્ગવિલઙ્ઘિના ॥ ૧૫-૫૩ ॥

રઘુનાથોઽપ્યગસ્ત્યેન માર્ગસંદર્શિતાત્મના ।
મહૌજસા સંયુયુજે શરત્કાલ ઇવેન્દુના ॥ ૧૫-૫૪ ॥

કુમ્ભયોનિરલંકારં તસ્મૈ દિવ્યપરિગ્રહમ્ ।
દદૌ દત્તં સમુદ્રેણ પીતેનેવાત્મનિષ્ક્રયમ્ ॥ ૧૫-૫૫ ॥

સ દધન્મૈથિલીકણ્ઠનિર્વ્યાપારેણ બાહુના ।
પશ્ચાન્નિવવૃતે રામઃ પ્રાક્પરાસુર્દ્વિજાત્મજઃ ॥ ૧૫-૫૬ ॥

તસ્ય પૂર્વોદિતાં નિન્દાં દ્વિજઃ પુત્રસમાગતઃ ।
સ્તુત્વા નિવર્તયામાસ ત્રાતુર્વૈવસ્વતાદપિ ॥ ૧૫-૫૭ ॥

તમધ્વરાય મુક્તાશ્વં રક્ષઃકપિનરેશ્વરાઃ ।
મેઘાઃ સસ્યમિવામ્ભોભિરભ્યવર્ષન્નુપાયનૈઃ ॥ ૧૫-૫૮ ॥

દિગ્ભ્યો નિમન્ત્રિતાશ્ચૈનમભિજગ્મુર્મહર્ષયઃ ।
ન ભૌમાન્યેવ ધિષ્ણ્યાનિ હિત્વા જ્યોતિર્મયાન્યપિ ॥ ૧૫-૫૯ ॥

ઉપશલ્યનિવિષ્ટૈસ્તૈશ્ચતુર્દ્વારમુખી બભૌ ।
અયોધ્યા સૃષ્ટલોકેવ સદ્યઃ પૈતામહી તનુઃ ॥ ૧૫-૬૦ ॥

શ્લાઘ્યસ્ત્યાગોઽપિ વૈદેહ્યાઃ પત્યુઃ પ્રાગ્વંશવાસિનઃ ।
અનન્યજાનેઃ સૈવાસીદ્યસ્માજ્જાયા હિરણ્મયી ॥ ૧૫-૬૧ ॥

વિધેરધિકસંભારસ્તતઃ પ્રવવૃતે મખઃ ।
આસન્યત્ર ક્રિયાવિઘ્ના રાક્ષસા એવ રક્ષિણઃ ॥ ૧૫-૬૨ ॥

અથ પ્રાચેતસોપજ્ઞં રામાયણમિતસ્તતઃ ।
મૈથિલેયૌ કુશલવૌ જગતુર્ગુરુચોદિતૌ ॥ ૧૫-૬૩ ॥

વૃત્તં રામસ્ય વાલ્મીકેઃ કૃતિસ્તૌ કિંનરસ્વનૌ ।
કિં તદ્યેન મનો હર્તુમલં સ્યાતાં ન શ‌ૃણ્વતામ્ ॥ ૧૫-૬૪ ॥

રૂપે ગીતે ચ માધુર્યંતયોસ્તજ્જ્ઞૈર્નિવેદિતમ્ ।
દદર્શ સાનુજો રામઃ શુશ્રાવ ચ કુતૂહલી ॥ ૧૫-૬૫ ॥

તદ્ગીતશ્રવણૈકાગ્રા સંસદશ્રુમુખી બભૌ ।
હિમનિષ્યન્દિની પ્રાતર્નિર્વાતેવ વનસ્થલી ॥ ૧૫-૬૬ ॥

વયોવેષવિસંવાદિ રામસ્ય ચ તયોસ્તદા ।
જનતા પ્રેક્ષ્ય સાદૃશ્યં નાક્ષિકમ્પં વ્યતિષ્ઠત ॥ ૧૫-૬૭ ॥

ઉભયોર્ન તથા લોકઃ પ્રાવીણ્યેન વિસિષ્મિયે ।
નૃપતેઃ પ્રીતિદાનેષુ વીતસ્પૃહતયા યથા ॥ ૧૫-૬૮ ॥

ગેયે કો નુ વિનેતા વાં કસ્ય ચેયં કૃતિઃ કવેઃ ।
ઇતિ રાજ્ઞા સ્વયં પૃષ્ટૌ તૌ વાલ્મીકિમશંસતામ્ ॥ ૧૫-૬૯ ॥

અથ સાવરજો રામઃ પ્રાચેતસમુપેયિવાન્ ।
ઊરીકૃત્યાત્મનો દેહં રાજ્યમસ્મૈ ન્યવેદયત્ ॥ ૧૫-૭૦ ॥

સ તાવાખ્યાય રામાય મૈથિલીયૌ તદાત્મજૌ ।
કવિઃ કારુણિકો વવ્રે સીતાયાઃ સંપરિગ્રહમ્ ॥ ૧૫-૭૧ ॥

તાત શુદ્ધા સમક્ષં નઃ સ્નુષા તે જાતવેદસિ ।
દૌરાત્મ્યાદ્રક્ષસસ્તાં તુ નાત્રત્યાઃ શ્રદ્દધુઃ પ્રજાઃ ॥ ૧૫-૭૨ ॥

તાઃ સ્વચારિત્ર્યમુદ્દિશ્ય પ્રત્યાયયતુ મૈથિલી ।
તતઃ પુત્રવતીમેનાં પ્રતિપત્સ્યે ત્વદાજ્ઞયા ॥ ૧૫-૭૩ ॥

ઇતિ પ્રતિશ્રુતે રાજ્ઞા જાનકીમાશ્રમાન્મુનિઃ ।
શિષ્યૈરાનાયયામાસ સ્વસિદ્ધિં નિયમૈરિવ ॥ ૧૫-૭૪ ॥

અન્યેદ્યુરથ કાકુત્સ્થઃ સંનિપાત્ય પુરૌકસઃ ।
કવિમાહ્વાયયામાસ પ્રસ્તુતપ્રતિપત્તયે ॥ ૧૫-૭૫ ॥

સ્વરસંસ્કારવત્યાસૌ પુત્રાભ્યામથ સીતયા ।
ઋચેવોદર્ચિષં સૂર્યં રામં મુનિરુપસ્થિતઃ ॥ ૧૫-૭૬ ॥

કાષાયપરિવીતેન સ્વપદાર્પિતચક્ષુષા ।
અન્વમીયત શુદ્ધેતિ શાન્તેન વપુષૈવ સા ॥ ૧૫-૭૭ ॥

જનાસ્તદાલોકપથાત્પ્રતિસંહૃતચક્ષુષઃ ।
તસ્થુસ્તેઽવાઙ્મુખાઃ સર્વે ફલિતા ઇવ શાલયઃ ॥ ૧૫-૭૮ ॥

તાં દૃષ્ટિવિષયે ભર્તુર્મુનિરાસ્થિતવિષ્ટરઃ ।
કુરુ નિઃસંશયં વત્સે સ્વવૃત્તે લોકમિત્યશાત્ ॥ ૧૫-૭૯ ॥

અથ વાલ્મીકિશિષ્યેણ પુણ્યમાવર્જિતં પયઃ ।

આચમ્યોદીરયામાસ સીતા સત્યાં સરસ્વતીમ્ ॥ ૧૫-૮૦ ॥

વાઙ્મનઃકર્મભિઃ પત્યૌ વ્યભિચારો યથા ન મે ।
તથા વિશ્વંભરે દેવિ મામન્તર્ધાતુમર્હસિ ॥ ૧૫-૮૧ ॥

એવમુક્તે તયા સાધ્વ્યા રન્ધ્રાત્સદ્યોભવાદ્ભુવઃ ।
શાતહ્રદમિવ જ્યોતિઃ પ્રભામણ્ડલમુદ્યયૌ ॥ ૧૫-૮૨ ॥

તત્ર નાગફણોત્ક્ષિપ્તસિંહાસનનિષેદુષી ।
સમુદ્રરશના સાક્ષાત્પ્રાદુરાસીદ્વસુંધરા ॥ ૧૫-૮૩ ॥

સા સીતામઙ્કમારોપ્ય ભર્તૃપ્રણિહિતેક્ષણામ્ ।
મામેતિ વ્યાહરત્યેવ તસ્મિન્પાતાલમભ્યગાત્ ॥ ૧૫-૮૪ ॥

ધરાયાં તસ્ય સંરમ્ભં સીતાપ્રત્યર્પણૈષિણઃ ।
ગુરુર્વિધિબલાપેક્ષી શમયામાસ ધન્વિનઃ ॥ ૧૫-૮૫ ॥

ઋષીન્વિસૃજ્ય યજ્ઞાન્તે સુહૃદશ્ચ પુરસ્કૃતાન્ ।
રામઃ સીતાગતં સ્નેહં નિદધે તદપત્યયોઃ ॥ ૧૫-૮૬ ॥

યુધાજિતસ્ય સંદેશાત્સ દેશં સિન્ધુનામકમ્ ।
દદૌ દત્તપ્રભાવાય ભરતાય ભૃતપ્રજઃ ॥ ૧૫-૮૭ ॥

ભરતસ્તત્ર ગન્ધર્વાન્યુધિ નિર્જિત્ય કેવલમ્ ।
આતોદ્યં ગ્રાહયામાસ સમત્યાજયદાયુધમ્ ॥ ૧૫-૮૮ ॥

સ તક્ષપુષ્કલૌ પુત્રૌ રાજધાન્યોસ્તદાખ્યયોઃ ।
અભિષિચ્યાભિષેકાર્હૌ રામાન્તિકમગાત્પુનઃ ॥ ૧૫-૮૯ ॥

અઙ્ગદં ચન્દ્રકેતું ચ લક્ષ્મણોઽપ્યાત્મસંભવૌ ।
શાસનાદ્રઘુનાથસ્ય ચક્રે કારાપથેશ્વરૌ ॥ ૧૫-૯૦ ॥

ઇત્યારોપિતપુત્રાસ્તે જનનીનાં જનેશ્વરાઃ ।
ભર્તૃલોકપ્રપન્નાનાં નિવાપાન્વિદધુઃ ક્રમાત્ ॥ ૧૫-૯૧ ॥

ઉપેત્ય મુનિવેષોઽથ કાલઃ પ્રોવાચ રાઘવમ્ ।
રહઃસંવાદિનૌ પશ્યેદાવાં યસ્તં ત્યજેરિતિ ॥ ૧૫-૯૨ ॥

તથેતિ પ્રતિપન્નાય વિવૃતાત્મા નૃપાય સઃ ।
આચખ્યૌ દિવમધ્યાસ્વ શાસનાત્પરમેષ્ઠિનઃ ॥ ૧૫-૯૩ ॥

વિદ્વાનપિ તયોર્દ્વાઃસ્થઃ સમયં લક્ષ્મણોઽભિનત્ ।
ભીતો દુર્વાસસઃ શાપાદ્રામસંદર્શનાર્થિના ॥ ૧૫-૯૪ ॥

સ ગત્વા સરયૂતીરં દેહત્યાગેન યોગવિત્ ।
ચકારાવિતથાં ભ્રાતુઃ પ્રતિજ્ઞાં પૂર્વજન્મનઃ ॥ ૧૫-૯૫ ॥

તસ્મિન્નાત્મચતુર્ભાગે પ્રાઙ્નાકમધિતસ્થુષિ ।
રાઘવઃ શિથિલં તસ્થૌ ભુવિ ધર્મસ્ત્રિપાદિવ ॥ ૧૫-૯૬ ॥

સ નિવેશ્ય કુશાવત્યાં રિપુનાગાઙ્કુશં કુશમ્ ।
શરાવત્યાં સતાં સૂક્તૈર્જનિતાશ્રુલવં લવમ્ ॥ ૧૫-૯૭ ॥

ઉદક્પ્રતસ્થે સ્થિરધીઃ સાનુજોઽગ્નિપુરઃસરઃ ।
અન્વિતઃ પતિવાત્સલ્યાદ્ગૃહવર્જમયોધ્યયા ॥ ૧૫-૯૮ ॥

જગૃહુસ્તસ્ય ચિત્તજ્ઞાઃ પદવીં હરિરાક્ષસાઃ ।
કદમ્બમુકુલસ્થૂલૈરભિવૃષ્ટાં પ્રજાશ્રુભિઃ ॥ ૧૫-૯૯ ॥

ઉપસ્થિતવિમાનેન તેન ભક્તાનુકમ્પિના ।
ચક્રે ત્રિદિવનિઃશ્રેણિઃ સરયૂરનુયાયિનામ્ ॥ ૧૫-૧૦૦ ॥

યદ્ગોપ્રતરકલ્પોઽભૂત્સંમર્દસ્તત્ર મજ્જતામ્ ।
અતસ્તદાખ્યયા તીર્થં પાવનં ભુવિ પપ્રથે ॥ ૧૫-૧૦૧ ॥

સ વિભુર્વિબુધાંશેષુ પ્રતિપન્નાત્મમૂર્તિષુ ।
ત્રિદશીભૂતપૌરાણાં સ્વર્ગાન્તરમકલ્પયત્ ॥ ૧૫-૧૦૨ ॥

નિર્વર્ત્યૈવં દશમુખશિરશ્છેદકાર્યં સુરાણાં
વિષ્વક્સેનઃ સ્વતનુમવિશત્સર્વલોકપ્રતિષ્ઠામ્ ।
લઙ્કાનાથં પવનતનયં ચોભયં સ્થાપયિત્વા
કીર્તિસ્તમ્ભદ્વયમિવ ગિરૌ દક્ષિણે ચોત્તરે ચ ॥ ૧૫-૧૦૩ ॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
શ્રીરામસ્વર્ગારોહણો નામ પઞ્ચદશઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 15 by Kalidas*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*